**दिनाङ्क :- 25/02/2025** **सायम् - 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

- प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना अद्य गुवाहट्यां एडवांटेज-असम इत्यस्य निवेशावसंरचना-शिखरसम्मेलनस्य उद्घाटन-सत्रं सम्बोधयता प्रोक्तं यत् असमराज्यम् अधुना असीमितसम्भावनायाः केन्द्रं, दक्षिण-पूर्व-एशियाक्षेत्रस्य भारतस्य च प्रवेशद्वारम् अस्ति ।
- दिल्ल्याः मुख्यमन्त्री रेखागुप्ता विधानसभायां मद्यनीति-सम्वलिता कैग इति सूचनाप्रपत्रं प्रस्तुतवती, सभाध्यक्षः आम-आदमी-पार्टीति दलस्य द्वादश-विधायकान् सदनात् बहिः निष्कासितवान् ।
- संयुक्त-राष्ट्र-सुरक्षा-परिषदा यूक्रेन-संघर्षः त्वरया समाप्तुं , रूस-यूक्रेन-देशयोः मध्ये स्थायि-शान्तेः आग्रहपूर्वकं अमेरिकायाः प्रस्तावः स्वीकृतः अस्ति ।
- भारत-ऋतु-विभागेन आगामि दिनद्वयोः पश्चिमहिमालयीय पर्वतेषु, देशस्य पूर्वोत्तरक्षेत्रेषु च वृष्टेः पूर्वानुमानं प्रकटितम् अस्ति।
- अपि च,
- महिलाप्रीमियरलीग इत्यस्यां क्रिकेट्-क्रीडा-प्रतिस्पर्धायाम् अद्य सायं बेङ्गलूरुनगरस्य एम.चिन्नास्वामी-क्रीडाङ्गणे गुजरात-जायंट्स-दलं दिल्ली-कैपिटल्स-दलं सम्मुखी करिष्यति।

प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना अद्य गुवाहट्यां एडवांटेज-असम इत्यस्य निवेशावसंरचना-शिखरसम्मेलनस्य उद्घाटन-सत्रं सम्बोधयता प्रोक्तं यत् असमराज्यम् अधुना असीमितसम्भावनायाः केन्द्रं, दक्षिण-पूर्व-एशियाक्षेत्रस्य भारतस्य च प्रवेशद्वारम् अस्ति । राजनयिकानां, प्रमुखोद्योगपतिनां, विदेशिप्रतिनिधीनां च एकां बृहत्तमसभां सम्बोधयन् प्रधानमन्त्री प्रोक्तवान् यत् असमराज्यम् पूर्वभारतस्य विनिर्माण-केंद्रं भविष्यति अपि च तेन अस्य रणनीतिकस्थानस्य लाभः समावाप्तुं उद्योगपतिनः अभ्यर्थिताः सन्ति ।

प्रधानमन्त्रिणा प्रोक्तं यत् तस्य सर्वकारः सम्पर्कावसंरचनायां संशोधनं कर्तुं अस्मिन् क्षेत्रे स्थानीयापूर्ति-श्रृंखलाः सुदृढं कर्तुं च कार्यं करोति ।भारतं न्यूनतममूल्यकायै विनिर्माण-प्रक्रियायै अभिनस्तरीयं कार्यं कुर्वद् अस्ति ।

प्रधानमंत्री पुनः प्रोक्तवान् यत् असमराज्ये न्यायिक-व्यवस्थायाः स्थितिः सुदृढा जाता अस्ति । विगतेषु केषुचित् वर्षेषु केंद्र-राज्य-सर्वकाराभ्यां अनेके शांति-प्रस्तावाः हस्तक्षरिताः सन्ति ।

असमस्य राज्यपालः, L.P. आचार्य, विदेश-मंत्री एस.जयशंकरः, मुख्यमंत्री हिमंत-बिस्वा-सरमा, केंद्रीय-पत्तन-नौवहन-जलमार्ग-मंत्री, सर्बानंद-सोनोवालः, केंद्रीय-मंत्री, ज्योतिरादित्य-सिंधिया , एकषष्टि-राजनयिकाः, विविधदेशानां व्यापार-प्रतिनिधिमण्डलानि, उद्योग-विशेषज्ञाः च अस्मिन् सत्रे भागं भजितवन्तः । केंद्रीय -सूचना-प्रसारण-मंत्री अश्विनी-वैष्णवः अपि अस्मिन् शिखरसम्मेलने भागं भजिष्यति/भजितवान् ।

**कैग/प्रतिवेदनम्**

आम आदमी पार्टीति दलस्य सर्वकारस्य मद्यनीत्या सह सम्बद्धे भारतस्य नियन्त्रक-महालेखापरीक्षक-कैग् इत्यनेन प्रकाशितप्रपत्रे प्रकाशितम् अस्ति यत् नीत्याः कारणेन सर्वकारीयकोषे द्विसहस्रकोटिरूप्यकाणां राजस्वेत्यस्य हानिः अभवत्। अद्य दिल्ल्याः मुख्यमन्त्री रेखागुप्ता दिल्लीविधानसभायां प्रस्तुत-प्रतिवेदने दिल्लीनगरे मद्यापूर्तेः निरीक्षणं विनियमनं च नगरस्य आबकारीविभागेन कृताः नैकाः विसंगतयः प्रदर्शिताः। तत्र ज्ञातम् अभवत् यत् विभिन्नेभ्यः विक्रेतृवर्गेभ्यः अनुज्ञापत्रप्रदाने नियमानाम् उल्लङ्घनं जातम्। तत्र उक्तं यत् विभागेन विभिन्नप्रकाराणां अनुज्ञापत्राणि प्रदाने आबकारीनियमैः सम्बद्धानां विविधानां आवश्यकतानां पुष्टिं विनैव अनुज्ञापत्रं प्रदत्तम्। कैग इत्यनेन प्रतिवेदने अपर्याप्तगुणवत्तानियन्त्रणस्य विषयः अपि प्रदर्शितः। तत्रैव आमआदमी

पार्टीति दलस्य द्वादश-विधायकाः, येषु अतिशी, गोपालरायः ,इमरान हुसैनः, विशेष रविः च सम्मिलिताः सन्ति, ते दिल्ली विधानसभासत्रस्य प्रचलितानां त्रयाणां उपवेशनानां कृते निलम्बिताः सन्ति। अद्य विधानसभायां उपराज्यपालस्य विनयकुमारसक्सेनावर्यस्य सम्बोधनावधौ तेषां अमर्यादितव्यवहारस्य कृते निलम्बनं जातम्।

**सम्प्रति महाकुंभ संबद्धाः वार्ताः**

**महाकुम्भ प्रयागराजः**

**प्रयागराजे समनुष्ठीयमाने महाकुम्भे पञ्चाशत्-सहस्राधिक-त्रिलक्षतः अधिकाः भक्ताः अन्तर्जालानुभव-केंद्रम् इत्यस्य यात्रां विहितवन्तः सन्ति। आध्यात्मिकता ं नवाचारेण सह संप्रयुज्य ,एतत् केन्द्रम् आधुनिक-तन्त्रज्ञान-माध्यमेन प्राचीन-पौराणिक-कथाः पुनर्जीवितं करोति ।अस्माकं सम्वाददाता प्रोक्तवान् यत् राष्ट्रपतिना द्रौपदीमुर्मु-वर्यया भूटाननरेशेण जिग्मे-खेसर-नामग्याल इत्यनेन चापि अस्य प्रशंसा कृता अस्ति सहैव ताभ्यां अस्मिन् अन्तर्जालानुभव-केंद्रे महाकुंभस्य भव्यता रसास्वादिता अस्ति । महाकुंभ-मेलक-क्षेत्रस्य चतुर्थे संविभागे निर्मितम् अन्तर्जालानुभव-केंद्रम् , विशिष्टाध्यात्मिककार्यक्रमे एकं प्रमुखम् आकर्षणम् अस्ति । अनेन विशिष्ट-रूपेण युवागंतुकाः अन्तराष्ट्रिय-पर्यटकाः च आकर्षिताः सन्ति,येन पञ्चसप्ततिलक्षाधिक-एककोटि-रूप्यकाणां राजस्वं समुत्पन्नम् अस्ति । उत्तर-प्रदेशस्य मुख्यमन्त्रिणा योगिवर्येण अन्तर्जालानुभव-केंद्रम् प्रशंसयता एतत् परम्परा-प्रोद्योगिक्योः मध्ये सेतुरूपेण इंगितम् अस्ति । श्रीआदित्यनाथः प्रोक्तवान् यत् अनेन भारतीयाः सनातन-संस्कृतेः परिचयप्राप्तिं प्रति प्रोत्साहिताः भवन्ति । आस्थायाः भविष्यस्य नवाचारस्य च स्वकीयेन निर्बाधमिश्रणेन सह , केन्द्रं सफलतापूर्वकं लक्षाधिकेभ्यः भक्तेभ्यः**

**दिव्यं भव्यं च अनुभवं प्रदास्यति,येन महाकुंभः वास्तविकरूपेण ऐतिहासिकः सञ्जातः अस्ति ।**

-

**संयुक्तराष्ट्रम्-यूक्रेनः**

संयुक्त-राष्ट्र-सुरक्षा-परिषदा यूक्रेन-संघर्षः त्वरया समाप्तुं , रूस-यूक्रेन-देशयोः मध्ये स्थायि-शान्तेः आग्रहपूर्वकं अमेरिकायाः प्रस्तावः स्वीकृतः अस्ति । प्रस्तावस्य पक्षे निर्विरोधानि दश-मतानि प्राप्तानि । फ्रांस्, ब्रिटेन, डेनमार्क, ग्रीस , स्लोवेनिया चेत्यादयः पञ्चदेशाः अनुपस्थिताः आसन्। प्रस्तावे पुनरुच्चारितम् अस्ति यत् संयुक्त-राष्ट्रस्य प्रमुखोद्देश्यम् अन्तराष्ट्रिय-शांतिं सुरक्षां च सुनिश्चित्य विवादानां शांतिपूर्वकं समाधानसंधानम् अस्ति । संयुक्त-राष्ट्रे संयुक्त-राज्यामेरिकायाः कार्यवाहक-राजदूतः, डोरोथीशीया इति एषः परिषदं प्रोक्तवान् यत् एषः प्रस्तावः शान्ति-सन्धिम् अतिरिच्य,शांतिमार्गम् अस्ति ।

**ऋतुविभागः**

भारत-ऋतु-विभागेन आगामि दिनद्वयोः पश्चिमहिमालयीय पर्वतेषु, देशस्य पूर्वोत्तरक्षेत्रेषु च वृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। आकाशवाण्या सह वार्तालापे ऋतु विभागस्य वरिष्ठवैज्ञानिकः डॉ. सोमा सेन रायः प्रोक्तवती यत् आगामिषु द्वि-त्रि-दिनेषु देशस्य पश्चिमीयतटे तापमानं अधिकं भवितुं शक्नोति।

**राष्ट्रपतिः**

राष्ट्रपतिः द्रौपदी मुर्मू अद्य देशे उत्तमचिकित्सासौविध्यानां विकेन्द्रीकरणे, स्वास्थ्यसेवायां च अधिकसंशोधनस्य विषये बलं दत्तवती। राष्ट्रपतिः पटना-नगरस्य बापूसभागारे पटना-चिकित्सा-महाविद्यालय-चिकित्सालस्य च शताब्दी-उत्सव-समारोहं सम्बोधयन्ती आसीत् । राष्ट्रपतिः प्रोक्तवती यत् यदि लघुनगरेषु चिकित्सासुविधाः उपलभ्यन्ते तर्हि बृहत्संस्थासु कार्यभारं न्यूनीकरिष्यते। एआइ

तथा रोबोटिक्स इत्युभयोः प्रौद्योगिक्योः उपयोगेन रोगिणां चिकित्सायां स्पष्टता क्षमता च वर्धते। राष्ट्रपतिः प्रसन्नतां प्रकटितवती यत् पटना-चिकित्सा-महाविद्यालय-चिकित्सालयः च प्रायः सार्द्धपञ्चसहस्रतोप्यधिकशय्यायुतं विश्वस्य द्वितीयं बृहत्तमं चिकित्सालयं विकसितं भवति।

-

## क्रिकेट महिलाप्रीमियरलीग

महिलाप्रीमियरलीग इत्यस्यां क्रिकेट्-क्रीडा-प्रतिस्पर्धायाम् अद्य सायं बेङ्गलूरुनगरस्य एम.चिन्नास्वामी-क्रीडाङ्गणे गुजरात-जायंट्स-दलं दिल्ली-कैपिटल्स-दलं सम्मुखी करिष्यति। क्रीडायाः प्रसारणं सायं सार्द्ध-सप्तवादने भविष्यति।